DIAMOND MOUNTAIN DIAMOND MOUNTAIN UNIVERSITY

# संस्कृत

SANSKRIT: THE TRANSLATOR’S COURSE
PART 1

# WEEK THREE

DIAMOND MOUNTAIN

# DIAMOND MOUNTAIN UNIVERSITY

Sanskrit: The Translator’s Course, Part 1
Brian Smith (Ven. Sumati Marut) (brian.smith@ucr.edu)

## Fall Term, Class Schedule

**WEEK THREE: Thursday, Oct. 30, 2008, 1:00 – 4:00 PM**

A. Quiz
B. Review of homework

**HOMEWORK:**

1. Provide a word by word English translation of Chapter 9, verses 15-40 of Master Shantideva’s **बोधिचर्यावतार**

यदा न भ्रान्तिरप्यस्ति माया केनोपलभ्यते॥ १५॥

यदा मायैव ते नास्ति तदा किमुपलभ्यते।
चित्तस्यैव स आकारो यद्यप्यन्योऽस्ति तत्त्वतः॥ १६॥

चित्तमेव यदा माया तदा किं केन दृश्यते।
उक्तं च लोकनाथेन चित्तं चित्तं न पश्यति।
न च्छिनत्ति यथात्मानमसिधारा तथा मनः॥ १७॥

आत्मभावं यथा दीपः संप्रकाशयतीति चेत्।

नैव प्रकाश्यते दीपो यस्मान्न तमसावृतः॥ १८॥

न हि स्फटिकवन्नीलं नीलत्वेऽन्यमपेक्षते।

तथा किंचित्परापेक्षमनपेक्षं च दृश्यते॥ १९॥

अनीलत्वे न तन्नीलं नीलहेतुर्यथेक्ष्यते।

नीलमेव हि को नीलं कुर्यादात्मानमात्मना॥ २०॥

दीपः प्रकाशत इति ज्ञात्वा ज्ञानेन कथ्यते।

बुद्धिः प्रकाशत इति ज्ञात्वेदं केन कथ्यते॥ २२॥

प्रकाशा वाप्रकाशा वा यदा दृष्टा न केनचित्।

वन्ध्यादुहितृलीलेव कथ्यमानापि सा मुधा॥ २३॥

यदि नास्ति स्वसंवित्तिर्विज्ञानं स्मर्यते कथम्।

अन्यानुभूते संबन्धात् स्मृतिराखुविषं यथा॥ २४॥

प्रत्ययान्तरयुक्तस्य दर्शनात्स्वं प्रकाशते।
सिद्धाञ्जनविधेर्दृष्टो घटो नैवाञ्जनं भवेत्॥ २५॥

यथा दृष्टं श्रुतं ज्ञातं नैवेह प्रतिषिध्यते।
सत्यतः कल्पना त्वत्र दुःखहेतुर्निवार्यते॥ २६॥

चित्तादन्या न माया चेन्नाप्यनन्येति कल्प्यते।
वस्तु चेत्सा कथं नान्यानन्या चेन्नास्ति वस्तुतः॥ २७॥

असत्यपि यथा माया दृश्या द्रष्टृ तथा मनः।
वस्त्वाश्रयश्चेत्संसारः सोऽन्यथाकाशवद्भवेत्॥ २८॥

वस्त्वाश्रयेणाभावस्य क्रियावत्त्वं कथं भवेत्।
असत्सहायमेकं हि चित्तमापद्यते तव॥ २९॥

ग्राह्यमुक्तं यदा चित्तं तदा सर्वे तथागताः।
एवं च को गुणो लब्धश्चित्तमात्रेऽपि कल्पिते॥ ३०॥

मायोपमत्वेऽपि ज्ञाते कथं क्लेशो निवर्तते।

यदा मायास्त्रियां रागस्तत्कर्तुरपि जायते॥ ३१॥

अप्रहीणा हि तत्कर्तुर्ज्ञेयसंक्लेशवासना।

तद्दृष्टिकाले तस्यातो दुर्बला शून्यवासना॥ ३२॥

शून्यतावासनाधानाद्धीयते भाववासना।

किंचिन्नास्तीति चाभ्यासात्सापि पश्चात्प्रहीयते॥ ३३॥

यदा न लभ्यते भावो यो नास्तीति प्रकल्प्यते।

तदा निराश्रयोऽभावः कथं तिष्ठेन्मतेः पुरः॥ ३४॥

यदा न भावो नाभावो मतेः संतिष्ठते पुरः।

तदान्यगत्यभावेन निरालम्बा प्रशाम्यति॥ ३५॥

चिन्तामणिः कल्पतरुर्यथेच्छापरिपूरणः।

विनेयप्रणिधानाभ्यां जिनबिम्बं तथेक्ष्यते॥ ३६॥

यथा गारुडिकः स्तम्भं साधयित्वा विनश्यति।
स तस्मिंश्चिरनष्टेऽपि विषादीनुपशामयेत्॥ ३७॥

बोधिचर्यानुरूप्येण जिनस्तम्भोऽपि साधितः।
करोति सर्वकार्याणि बोधिसत्त्वेऽपि निर्वृते॥ ३८॥

अचित्तके कृता पूजा कथं फलवती भवेत्।
तुल्यैव पठ्यते यस्मात्तिष्ठतो निर्वृतस्य च॥ ३९॥

आगमाच्च फलं तत्र संवृत्या तत्त्वतोऽपि वा।
सत्यबुद्धे कृता पूजा सफलेति कथं यथा॥ ४०॥